बुक-पोस्ट प्रकाशित सामग्री

गुरुकुल पत्रिका । प्रह्लाद । आर्य भट्ट

रजि० संख्या एल० १२७७

62

सेवा में,

____

____

____

व्यवसाय प्रबन्धक
गुरुकुल काँगड़ी विश्वविद्यालय
हरिद्वार

पार्वतीच परमेश्वरश्च पार्वतीपरमेश्वरौ २ पार्वतीपार्वतीति पार्वतीं पार्वतीपरमेश्वरौ

श्रीगणेशाय नमः गुरुचरणकमलेभ्यो नमः वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये

जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ॥१॥ क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ति-

तीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं ॥२॥ मंदः कवियशःप्रार्थी गमिष्याम्युपहास्यतां प्रांशुलभ्ये

फले मोहादुद्बाहुरिव वामनः ॥३॥ अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः मणौ वज्रसमुत्की-

र्णे सूत्रस्येवास्ति मे गतिः ॥४॥ सोहमाजन्मशुद्धानामाफलोदयकर्मणां आसमुद्रक्षिती-

शानामानाकरथवर्त्मनां ॥ यथाविधिहुताग्नीनां यथाकामार्चितार्थिनां ॥ यथापरा-

धदंडानां यथाकालप्रबोधिनां ॥६॥ त्यागाय संभृतार्थानां सत्याय मितभाषिणां ॥ यशसे विजिगी-

षूणां प्रजायै गृहमेधिनां ॥ शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणां ॥ वार्द्धके मुनिवृत्तीनां

योगेनांते तनुत्यजां ॥ रघूणामन्वयं वक्ष्ये तनुवाग्विभवोपि सन् ॥ तद्गुणैः कर्णमागत्य ।

चापलाय प्रचोदितः ॥ इति कुलकं ॥ तं संतः श्रोतुमर्हंति सदसद्व्यक्तिहेतवः हे

श्रोतुमर्हंति

श्रीराम

म्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥१०॥ वैवस्वतो मनुर्नाम माननीयो मनीषिणां ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥११॥ तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः । दि
लीप इति राजेंदुरिंदुः क्षीरनिधाविव ॥१२॥ व्यूढोरस्को वृषस्कंधः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥१३॥ सर्वातिरिक्तसारेण सर्वतेजोभिभावि
ना । स्थितः सर्वोन्नतेनोर्वीं क्रांत्वा मेरुरिवात्मना ॥१४॥ आकारसदृशप्रज्ञः प्रज्ञया सदृ
शागमः । आगमैः सदृशारंभः प्रारंभसदृशोदयः ॥१५॥ भीमकांतैर्नृपगुणैः स बभू
वोपजीविनां । अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ॥१६॥ रेखामात्रमपि क्षुण्णा
दा मनोर्वर्त्मनः परं । न व्यतीयुः प्रजास्तस्य नियंतुर्नेमिवृत्तयः ॥१७॥ प्रजानामेव भू
त्यर्थं स ताभ्यो बलिमग्रहीत् । सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥१८॥ सेनाप
रिच्छदस्तस्य द्वयमेवार्थसाधनं । शास्त्रेष्वव्याहता बुद्धिर्मौर्वी धनुषि चातता ॥१९॥
तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च । फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव

ॐ

॥२०॥ जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः॥ अगृध्नुराददे सोर्थमसक्तः सुखमन्वभू-
त्॥२१॥ ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः॥ गुणा गुणानुबंधित्वात्तस्य
सप्रसवा इव॥२२॥ अनाकृष्टस्य विषयैर्विद्यानां पारदर्शिनः॥ तस्य धर्मरतेरासी-
द्वृद्धत्वं जरसा विना॥२३॥ प्रजानां विनयाधानाद्रक्षणाद्भरणादपि॥ स पिता पित-
रस्तासां केवलं जन्महेतवः॥२४॥ स्थित्यै दंडयतो दंड्यान्परिणेतुः प्रसूतये॥ अप्यर्थ-
कामौ तस्यास्तां धर्म एव मनीषिणः॥२५॥ दुदोह गां स यज्ञाय सस्याय मघवा दिवं
॥ संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं॥२६॥ न किलानुययुस्तस्य राजानो रक्षितुर्यशः
॥ व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता॥२७॥ द्वेष्योपि संमतः शिष्टस्तस्यार्त-
स्य यथौषधं॥ त्याज्यो दुष्टः प्रियोप्यासीदंगुष्ठइवाहिना॥२८॥ तं वेधा विदधे नू-
नं महाभूतसमाधिना॥ तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः॥२९॥ श्री॥

महाभूतानां समाधिः महाभूतसमाधिः तेन=१

कारणसामग्री=

तदेवदर्शयति१=

परार्थपवरैकफलं येषां ते=

श्रीराम॥

वेलैव वप्रः वेलावप्रः वेलावप्र एव वलयो यस्यां सा तां० = अविद्यमानमन्यस्य शासनं यस्यां सा० = अनन्यशासनं यस्यां सा = एका चासौ पुरी च =

स वेलावप्रवलयां परिखीकृतसागरां ॥ अनन्यशासनामुर्वीं शशासैकपुरीमिव ॥३०॥

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ॥ पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥३१॥

कलत्रवन्तमात्मानमवरोधे महत्यपि ॥ तया मेने मनस्विन्या लक्ष्म्या च वसुधाधिपः ॥३२॥

विलंबितः फलं येषां ते विलंबितफलाः तैः ॥

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ॥ विलंबितफलैः कालं स निनाय मनोर-

थैः ॥३३॥ जगं भगीरथे नैव पूर्वं बांधवनंदनो ॥ इष्टतां संततिं तेनन्यत्तां मंत्रिषु कोश-

संतानस्य अर्थाय संतानार्थाय

ला ॥३४॥ संतानार्थाय विधये स्वभुजादवतारिता ॥ तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे

पुत्रस्य काम्या पुत्रकाम्या तया =

॥३५॥ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ॥ तौ दंपती वसिष्ठस्य गुरोर्जग्मतुराश्रमं

स्निग्धो मधुरो गंभीरो निर्घोषो यस्य तं =

॥३६॥ स्निग्धगंभीरनिर्घोषमेकं स्यंदनमास्थितौ ॥ प्रावृषेण्यं पयोवाहं विद्युदैरावताविव

सुखः स्पर्शो येषां ते सुखस्पर्शाः तैः =

व ॥३७॥ सेव्यमानौ सुखस्पर्शैः शालनिर्यासगंधिभिः ॥ पुष्परेणूत्किरैर्वातैराधूतवनराजि-

माभूदाश्रमपीडेति परमेयपुरःसरौ ॥ अनुभावविशेषात्तु सेनापरिवृताविव ॥ ३७ ॥

शालानां निर्यासस्य गंधो येषु ते शालनिर्यासगंधिनः तैः ॥

पुष्पाणां रेणून् उत्किरंति पुष्परेणूत्कराः तैः =

र०
वं०
॥३॥

भिः॥३९॥ मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः। षड्जसंवादिनीः केका द्विधा भिन्नाः शि
खण्डिभिः॥४०॥ परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु। मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टि
षु॥४१॥ श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजं॥ सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ॥४
२॥ पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः। रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्ट
नौ॥४३॥ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां॥ अमोघाः प्रतिगृह्णन्तावर्घ्यानुप
दमाशिषः॥४४॥ हैयंगवीनमादाय घोषवृद्धानुपस्थितान्। नामधेयानि पृच्छन्तौ व
न्यानां मार्गशाखिनां॥४५॥ सरसीष्वरविन्दानां वीचिविक्षोभशीतलं॥ आमोदमुप
जिघ्रन्तौ स्वनिःश्वासानुकारिणं॥४६॥ कुलकं॥ काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेषयोः
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव॥४७॥ तत्तद्भूमिपतिः पत्न्यै दर्शयन्

३

प्रियदर्शनः ॥ अपिलंघितमध्वानं बुबुधे न बुधोपमः ॥४८॥ स दुःप्रापयशाः प्रापदाश्रमं

श्रान्तवाहनः ॥ सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥४९॥ वनांतरादुपावृत्तैः स्कंधा-

सक्तसमित्कुशैः ॥ अग्निप्रत्युद्गमात्पूतैः पूर्यमाणं तपस्विभिः ॥५०॥ सेकान्ते मुनिकन्याभिस्त-

त्क्षणोज्झितवृक्षकं ॥ विश्वासाय विहंगानामालवालांबुपायिनां ॥५१॥ आतपात्ययसंक्षिप्त-

नीवारासु निषादिभिः ॥ मृगैर्वर्तितरोमंथमुटजांगनभूमिषु ॥५२॥ आकीर्णमृषिपत्नीनामुटज-

द्वाररोधिभिः ॥ अपत्यैरिव नीवारभागधेयोचितैर्मृगैः ॥५३॥ अभ्युत्थिताग्निपिशुनैरतिथीनाश्र-

मोन्मुखान् ॥ पुनानं पवनोद्धूतैर्धूमैराहुतिगंधिभिः ॥५४॥ अथ यन्तारमादिश्य धुर्यान्वि-

श्रामयेति सः ॥ तामवारोहयत्पत्नीं रथादवततार च ॥५५॥ तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमे-

न्द्रियाः ॥ अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥५६॥ विधेः सायंतनस्यांते स ददर्श तपोनिधिं

अन्वासीनमरुंधत्या स्वाहयेव हविर्भुजं ॥५७॥ तयोर्जगृहतुः पादौ राजा राज्ञी च मागधी ॥

ओम
रं
वं
४

8

तौ गुरुं गुरुपत्नीं च प्रीत्या प्रतिननंदतुः ॥५८॥ तमातिथ्यक्रियाशांतरथक्षोभपरिश्रमं ॥ पप्रच्छ
कुशलं राज्ये राज्याश्रममुनिं मुनिः ॥५९॥ अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः ॥ अर्थ्याम
र्थपतिर्वाचमाददे वदतां वरः ॥६०॥ उपपन्नं ननु शिवं सप्तस्वंगेषु यस्य मे ॥ दैवीनां मानुषी
णां च प्रतिहर्ता त्वमापदां ॥६१॥ तव मंत्रकृतो मंत्रैर्दूरात्संशमितारिभिः ॥ प्रत्यादिश्यंते
इव मे दृष्टलक्ष्यभिदः शराः ॥६२॥ हविरावर्जितं होतस्त्वया विधिवदग्निषु ॥ वृष्टिर्भवति श
स्यानामवग्रहविशोषिणां ॥६३॥ पुरुषायुषजीविन्यो निरातंका निरीतयः ॥ यन्मदीयाः प्र
जास्तस्य हेतुस्त्वद्ब्रह्मवर्चसं ॥६४॥ त्वयैवं चिंत्यमानस्य गुरुणा ब्रह्मयोनिना ॥ सानुबंधाः क
थं न स्युः संपदो मे निरापदः ॥६५॥ किंतु वध्वां तवैतस्यामदृष्टसदृशप्रजं ॥ न मामवति सद्वी
पा रत्नसूरपि मेदिनी ॥६६॥ नूनं मत्तः परं वंश्याः पिंडविच्छेददर्शिनः ॥ न प्रकाममुजः श्रा

श्रीराम
४

श्रीः

द्धं स्वधासंग्रहतत्पराः ॥६७॥ मत्परं दुर्लभं मत्वा नूनमावर्जितं मया पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुप
भुज्यते ॥६८॥ सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ॥ प्रकाशश्चान्धकारश्च लोकालोक इवा
चलः ॥६९॥ लोकान्तरसुखं पुण्यं तपोदानसमुद्भवं ॥ संततिः शुद्धवंश्या हि परत्रेह च शर्मणे
॥७०॥ तया हीनं विधातर्मां कथं पश्यन्न दूयसे ॥ सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमपादपं ॥७१॥ अ
सह्यपीडं भगवन्नृणमन्त्यमवेहि मे ॥ अरुंतुदमिवालानं नवबद्धस्य दंतिनः ॥७२॥ तस्माद्य
था विमुच्येहं संविधातुं त्वमर्हसि ॥ इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः ॥७३॥ इति वि
ज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ॥ क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ॥७४॥ सोऽपश्यत्प्र
णिधानेन संततेः स्तंभकारणं ॥ भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ॥७५॥ पुरा शक्रमुपा
स्थाय तवोर्वीं प्रति यास्यतः ॥ आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥७६॥ धर्मलोपभयाद्राज्ञी
स्मृत्वा सपदि सत्वरः ॥ प्रदक्षिणक्रियातीतस्तस्यां त्वं साधु नाचरः ॥७७॥ इमां देवीमृतुस्नातां स्मृ
त्वा सपदि सत्वरः ॥ प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनत् ॥७८॥ अवजानासि मां यस्मा

पाठान्तरं:

प्रकाशश्चाप्रकाशश्च इति द्विपाठः

ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ॥ प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥७९॥

इतस्तेन भविष्यति ॥ मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥७७॥ स शापो न त्वया
राजन्न च सारथिना श्रुतः ॥ नदत्याकाशगंगायाः स्रोतस्युद्दाममदिग्गजे ॥७८॥ हविषे दीर्घस
त्रस्य सा चेदानीं प्रचेतसः ॥ भुजंगपिहितद्वारं पातालमधितिष्ठति ॥८०॥ सुतां मदीयां
सुरभेः कृत्वा प्रतिनिधिं शुचिः ॥ आराधय सपत्नीकः प्रीता कामदुघा हि सा ॥८१॥ पाठां
तरं ॥ सुतां मे कोतरं तस्यामदीयां वत्समातरं ॥ आराधय सपत्नीकः सा वां कामं विधास्य
ति ॥ इति वादिन एवास्य होतुराहुतिसाधनं ॥ अनिन्द्या नन्दिनी नाम धेनुराववृते
वनात् ॥८२॥ ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ॥ बिभ्रती श्वेतरोमांकं सं
ध्येव शशिनं नवं ॥८३॥ रजःकणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ॥ तीर्थाभि
षेकजां शुद्धिमादधाना महीपतेः ॥८४॥ तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ॥
याज्यमाशंसितां सिद्धिं प्रार्थिवं पुनरब्रवीत् ॥८५॥ अदूरवर्तिनीं सिद्धिं राजन्विगण

भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ॥ प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥८४॥

श्रीराम

यात्मनः। उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत्॥ वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गां। विद्यामभ्यसने
नैव प्रसादयितुमर्हसि॥ प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः। निषण्णायां निषीदास्यां पी
ताम्भसि पिबेरपः॥ वधूर्भक्तिमती चैनामर्चितामा तपोवनात्। प्रयाता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि॥
इत्या प्रसादादस्यास्त्वं परिचर्यापरो भव। अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणां॥ तथेति प्रति
जग्राह प्रीतिमान्सपरिग्रहः। आदेशं देशकालज्ञः शिष्यः शासितुरानतः॥ अथ प्रदोषे
दोषज्ञः संवेशाय विशांपतिं। सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियं॥ सत्यामपि तपःसिद्धौ
नियमापेक्षया मुनिः। कल्पवित्कल्पयामास वन्यामेवास्य संविधां॥ निर्दिष्टां कुलपतिना
स पर्णशालामध्यास्य प्रयतपरिग्रहद्वितीयः। तच्छिष्याध्ययननिवेदितावसानां संविष्टः कुश
शयने निशां निनाय॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ वसिष्ठाश्रमाभिगमनो ना

॥ ॐम् ॥

॥ र ॥ ॥ घु ॥ ॥ वं ॥

जायया सुदक्षिणया प्रतिग्राहिते स्वात् प्रतिग्राहिते
स्वीकारे गंधमाल्ये

प्रत्यूषार्थ्य: प्रातःकाले   वद्ध

अथ प्रथमः सर्गः ॥ अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां ॥ वनाय पीतप्रतिबद्धवत्सां 12

यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥ तस्याः खुरन्यासपवित्रपांशुमपांशुलानां धुरि कीर्तनीयाः ॥ मार्गं

मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगछत् ॥ २ ॥ निवर्त्य राजा दयितां दयालुस्तां सौ

रभेयीं सुरभिर्यशोभिः ॥ पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीं ॥ ३ ॥ व्रताय

तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥ नचान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि

मनोप्रसूतिः ॥ ४ ॥ आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च ॥ अव्याहतः स्वैर

गतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥ ५ ॥ स्थितः स्थितामुच्चलितः प्रयातां निषे

दुषीमासनबन्धधीरः ॥ जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगछत् ॥ ६ ॥

सन्यस्तचिह्नामपि राज्यलक्ष्मीं तेजोविशेषानुमितां दधानः ॥ आसीदविष्कृतदानराजि

ना

श्रीराम ॥ ६ ॥

13

उपलक्षितः=

रंतर्मदावस्थ इव द्विपेंद्रः॥७॥ लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं॥ र

क्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान्॥८॥ विसृष्टपार्श्वानुचरस्य तस्य पार्श्व

द्रुमाः पाशभृता समस्य॥ उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः॥९॥ म

रुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं॥ अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव

पौरकन्याः॥१०॥ धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः॥ विलोकयंत्यो वपुरापु

रक्ष्णां प्रकामविस्तारफलं हरिण्यः॥११॥ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं

वनदेवता भिः॥ शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी

॥ तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे॥१३॥ शशाम वृष्ट्यापि विना दवाग्निरासी

श्रीम
रघु
वं
८

14

द्विशेषात्फलपुष्पवृद्धिः॥ऊनंनसत्वेष्वधिकोबबाधे तस्मिन्वनंगोप्तरिगाहमाने॥१४॥संचार
पूतानिदिगंतराणिकृत्वादिनांतेनिलयायगंतुं॥प्रचक्रमेपल्लवरागताम्राप्रभापतंगस्यमुनेश्चधे
नुः॥१५॥तांदेवतापित्रतिथिक्रियार्थामन्वग्ययौमध्यमलोकपालः॥बभौचसातेनसतांमत
तेनश्रद्धेवसाक्षाद्विधिनोपपन्ना॥१६॥सपल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणा
नि॥ययौमृगाध्यासितशाद्वलानिश्यामायमानानिवनानिपश्यन्॥१७॥आपीनभारोद्वहनप्रय
त्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः॥उभावलंचक्रतुरंचिताभ्यांतपोवनावृत्तिपथंगताभ्यां॥१८॥
वशिष्ठधेनोरनुयायिनंतमावर्तमानंवनितावनांतात्॥पपौनिमेषालसपक्ष्मपंक्तिरुपोषि
ताभ्यामिवलोचनाभ्यां॥१९॥पुरस्कृतावर्त्मनिपार्थिवेनप्रत्युद्गतापार्थिवधर्मपत्न्या॥न

श्रीराम
८

दंतरे सा विरराज धेनुर्दिनक्षपामध्यगतेव संध्या ॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुद
क्षिणा साक्षतपात्रहस्ता ॥ प्रणम्य चानर्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः ॥२१॥ वत्सोत्सुकापि
स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ ॥ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पु
रःफलानि ॥२२॥ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः ॥ दोहावसाने पु
नरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां ॥२३॥ तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहि
णीसहायः ॥ क्रमेण सुप्तामनु संविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥२४॥ अन्येद्युरात्मा
नुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ॥ गंगाप्रपातांतविरूढशष्पं गौरीगुरोर्गह्वर
माविवेश ॥२६॥ सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ॥ अलक्षिता

श्री

र. वं.
८

16

भ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥ तदीयमाक्रंदितमार्त्तसाधोर्गुहानिबद्धप्रति
शब्ददीर्घं ॥ रश्मिष्विवादाय नगेंद्रसक्तां निवर्त्तयामास नृपस्य दृष्टिं ॥२८॥ स पाटलायां गवि
तस्थिवांसं धनुर्द्धरः केशरिणं ददर्श । अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्र
फुल्लं ॥२९॥ ततो मृगेंद्रस्य मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः ॥ जाताभिषंगो नृपतिर्निषंगा
दुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥३०॥ वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे ॥ सक्तांगुलिः सा
यकपुंख एव चित्रार्पितारंभ इवावतस्थे ॥३१॥ बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृश
द्भिः ॥ राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधरुद्धवीर्यः ॥३२॥ तमार्यगृह्यं निगृहीतधेनुर्मनुष्य ८
वाचा मनुवंशकेतुं ॥ विस्मापयन्विस्मितमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः ॥३३॥ अलं महीप श्रीराम

पालतवश्रमेणप्रयुक्तमप्यस्त्रमितोवृथास्यात् ॥ नपादपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छति
मारुतस्य ॥ ३४ ॥ कैलाशगौरंवृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं ॥ अवेहिमांकिंकरमष्ट
मूर्त्तेः कुंभोदरंनामनिकुंभमित्रं ॥ ३५ ॥ अमुंपुरः पश्यसिदेवदारुं पुत्रीकृतोसौवृषभध्वजेन ॥ योहेम
कुंभस्तननिःसृतानांस्कंदस्यमातुःपयसांरसज्ञः ॥ ३६ ॥ कंडूयमानेनकटंकदाचिद्वन्यद्विपेनो
न्मथितात्वगस्य ॥ अथैनमद्रेस्तनयाशुशोचसेनान्यमालीढमिवासुरास्त्रैः ॥ ३७ ॥ तदाप्रभृत्ये
वमत्त मतंगजानांत्रासार्थमस्मिन्नहमद्रिकुक्षौ ॥ व्यापारितःशूलभृताविधायसिंहत्वमंका
गतसत्ववृत्तिः ॥ ३८ ॥ तस्यालमेषाक्षुधितस्यतृप्त्यैप्रदिष्टकालापरमेश्वरेण ॥ उपस्थिता
शोणितपारणामेसुरद्विषश्चांद्रमसीसुधेव ॥ ३९ ॥ सत्वंनिवर्त्तस्वविहायलज्जांगुरौभवान्

॥ ॐ ॥
॥ र.वं ॥
॥ ९ ॥

18

दर्शितशिष्यभक्तिः ॥ शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥ ४० ॥ इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ॥ प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥
४१ ॥ प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभंगे वितथप्रयत्नः ॥ जडीकृतस्त्र्यम्बकवीक्षणेन
वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥ संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्तद्यदहं विवक्षुः ॥ अंत
र्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोभिधास्ये ॥ ४३ ॥ मान्यः स मे स्थावरजंगमानां सर्गस्थि
तिप्रत्यवहारहेतुः ॥ गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं ॥ ४४ ॥ स त्वं मदी
येन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ॥ दिनावसानोत्सुकबालवत्सा विसृज्यतां
धेनुरियं महर्षेः ॥ ४५ ॥ अथांधकारं गिरिकंदराणां दंष्ट्रामयूखैः शकलानि कु

श्रीराम ॥
॥ ९ ॥

र्त्तन् ॥ भूयः स भूतेश्वरपार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे ॥४६॥ एकातपत्रं जगतः प्रभुत्वं नवं वया
यः कान्तमिदं वपुश्च ॥ अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वं ॥४७॥ भूतानुकंपा त
व चेदियं गौरेका भवेत्स्वस्तिमती त्वदंते ॥ जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पा
सि ॥४८॥ अथैकधेनोरपराधचंडाद्गुरोः कृशानुप्रतिमाद्बिभेषि ॥ शक्योस्य मन्युर्भवता विनेतुं गाः
कोटिशः स्पर्शयता घटोध्नीः ॥४९॥ तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहं ॥ महीतलस
र्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥ एतावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन ॥ शि
लोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥५१॥ निशम्य देवानुचरस्य वाचं मनुष्यदे
वः पुनरप्युवाच ॥ धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥५२॥ क्षतात्किल त्रायत
इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ॥ राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥५३॥

ओम्
र वं
१०

कथंनुशक्योनुनयोमहर्षेर्विश्राणनाच्चान्यपयस्विनीनां ॥ इमामनूनांसुरभेरवेहिरुद्रौजसातुप्रहृतंत्वया

स्यां ॥५५॥ सेयंस्वदेहार्पणनिःक्रियेणन्याय्यामयामोचयितुंभवत्तः ॥ नपारणास्याद्विहतातवैवंभ

वेदलुप्तश्चमुनेःक्रियार्थः ॥५६॥ भवानपीदंपरवानवैतिमहान्हियत्नस्तवदेवदारौ ॥ स्थातुंनियो

क्तुर्नहिशक्यमग्रेविनाश्यरक्ष्यंस्वयमक्षतेन ॥५७॥ किमप्यहिंस्यस्तवचेन्मतोहंयशःशरीरेभवमेदया

लुः ॥ एकांतविध्वंसिसुमद्विधानांपिंडेष्वनास्थाखलुभौतिकेषु ॥५८॥ संबंधमाभाषणपूर्वमाहुर्वृ

त्तःसनौसंगतयोर्वनांते ॥ तद्भूतनाथानुगनार्हसित्वंसंबंधिनोमेप्रणयंविहंतुं ॥५९॥ तथेतिगामु

क्तवतेदिलीपःसद्यःप्रतिष्टंभविमुक्तबाहुः ॥ संन्यस्तशस्त्रोहरयेस्वदेहमुपानयत्पिंडमिवामिषस्य

॥६०॥ तस्मिन्क्षणेपालयितुःप्रजानामुत्पश्यतःसिंहनिपातमुग्रं ॥ अवाङ्मुखस्योपरिपुष्पवृ

ष्टिःपपातविद्याधरहस्तमुक्ता ॥६१॥ उत्तिष्ठवत्सेत्यमृतायमानंवचोनिशम्योत्थितमुत्थितःसन् ॥ द

श्रीराम:
१०

दर्शराजा जननीमिव स्वां गामग्रतः प्रस्नवतीं न सिंहं ॥६१॥ तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परी-
क्षितोसि ॥ ऋषिप्रभावान्मयि नान्तकोपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥६२॥ भक्त्या गुरौ मय्यनुकंपया च प्रीता-
स्मि ते पुत्र वरं वृणीष्व ॥ न केवलानां पयसां प्रसूतिमवैहि मां कामदुघां प्रसन्नां ॥६३॥ ततः समानी-
य समानितार्थीहस्तौ स्वहस्तार्जितवीरशब्दः ॥ वंशस्य कर्तारमनंतकीर्तिः सुदक्षिणायां तनयं यया-
चे ॥६४॥ संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुं-
क्ष्वेति तमादिदेश ॥६५॥ वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ॥ ओधस्यमिच्छामि
तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६६॥ इत्थं क्षितीशेन वशिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ॥
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥६७॥ तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां
गुरवे निवेद्य प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥६८॥ स नंदिनीस्तन्यमनिंदितात्मा
सद्वत्सलो वत्सहुतावशेषं पपौ वशिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥६९॥ प्रातर्यथोक्त

ॐम्
र वं
१२

व्रतपारणांते ब्रह्मामिकां स्वशयपन्तेष्वयुज्यं॥ तौ दंपती स्वां प्रतिराजधानीं प्रस्थापयामास वशी व
शिष्ठः॥७१॥ प्रदक्षिणीकृत्य हुतं हुताशमनंतरं भर्तुररुंधतींच॥ धेनुं सवत्सां च नृपः प्रतस्थे सन्मंग
लोदग्रतरप्रभावः॥७२॥ श्रोत्राभिरामध्वनिनारथेन स धर्मपत्नीसहितः सहिष्णुः॥ ययावनु
द्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन॥७३॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थ
व्रतकर्शितांगं॥ नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां॥७४॥ पुरंदरश्रीः पुर
मुत्पताकं प्रविश्य पौरैरभिनंद्यमानः॥ भुजे भुजंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससज्ज
॥७५॥ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं॥ नरपति
कुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः॥७६॥ इति श्रीरघुवंशे महा

सखीजनानां उद्दीप्तशोकौमुदीवत् मुखं यस्याः सा कौमुदीमुखी तां ॥२॥

काव्ये कालिदासकृतौ रघुवंशे ... द्वितीयः सर्गः ॥२॥ श्रीगणेशाय नमः ॥

चंद्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता इत्यमरः २ ५

निदानं त्वादिकारणं इत्यमरः

अथेप्सितं भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखं ॥ निदानमिक्ष्वाकुकुलस्य संततेः

शरीरस्य शादात् खेदात्

सुदक्षिणा दोहदलक्षणं दधौ ॥१॥ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपांडुना ॥ त ४ २

तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ॥२॥ मुखेन सा केतकपत्रपांडुना

कृशांगयष्टिः परिमेयभूषणा ॥ स्थितात्पतारां करुणेंदुमंडलां प्रभातकल्पां रजनीं विडंबय

न ॥३॥ ततो विशांपत्युरनन्यसंततेर्मनोरथं किंचिदिवोदयोन्मुखं ॥ अनन्यसौहार्दरसस्य दोह

मुखं एकांतः

दं प्रियाप्रपेदे प्रकृतिप्रियंवदा ॥४॥ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमा

कः सिंचितं जलबिंदुभिः मेघानां कस्मिन कमिव

ययौ ॥ करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं ॥५॥ दिवं मरुत्वानिव

ॐ
र॰वं॰
२२

मृत्भक्षणे

भोक्ष्यते भुवं दिगंतविश्रांतरथो हि तत्सुतः || अतोऽभिलाषे प्रथमं तथाविधे मनो बबंध अन्यरसा

मृदादिरसाः

न्विलंघ्य सा ||४|| न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती वस्तुषु केषु मागधी || इति स्म

प्रतिसमयं

पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ||५|| उपेत्य सा दोहददुःखशीलतां यदे

न साध्यं

व वव्रे तदपश्यदाहृतं || न हीष्टमस्य त्रिदिवेऽपि भूपतेरभूदनासाद्यमधिज्यधन्विनः ||६||

प्रचीयमाना ऽवयवा निपुणा: सा॰

क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा || पुराणपत्रापगमादनंतरं लतेव सं

नद्धमनोज्ञपल्लवा ||७|| निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतरलीनपावकां || नदीमि

वांतःसलिलां सरस्वतीं नृपः ससत्वां महिषीममन्यत ||८|| दिनेषु गच्छत्सु नितांतपीवरं

तदीयमानीलमुखं स्तनद्वयं तिरश्चकार भ्रमराभिलीनयोः सुजातयोः पंकजकोशयोः श्रियं ||

११४

श्रीरामः
२२